पवनाशः, पुं, (पवनं वायुं अश्नाति भक्षयतीति। अश भोजने+"कर्म्मण्यण्।" ३।२।१। इति अण्।) सर्पः। इति हलायुधः॥

पवनाशनः, पुं, (पवनो वायुरशनं भक्ष्यं यस्य।) सर्पः। इत्यमरः। १। ८। ८॥

पवनाशनाशः, पुं, (पवनाशस्य सर्पस्य नाशो यस्मात्। यद्वा, पवनाशनं सर्पमश्नातीति। अश्+अण्।) गरुड़ः। इति हलायुधः॥ मयूरः। यथा, उत्तरचोरपञ्चाशिकायाम्।

"स्वयोनिभक्षध्वजसम्भवानां
श्रुत्वा निनादं गिरिगह्वरेषु!
तमोऽरिविम्बप्रतिविम्बधारी
रराव कान्ते! पवनाशनाशः॥"

पवनेष्टः, पुं, (पवने वायुरोगे इष्टः।) महानिम्बः। इति रत्नमाला॥ (महानिम्बशब्देऽस्य गुणादिकं ज्ञेयम्॥)

पवनोम्भुजं, क्ली, परूषम्। इति शब्दचन्द्रिका॥

पवमानः, पुं, (पवते शोधयतीति। पूङ् शोधने+"पूङ्यजोः शानच्।" ३।२।१।८। इति शानच्। "आने मुक्।" ७।२।८२। इति मुमागमः।) वायुः। इत्यमरः। १।१।६६॥ (यथा, रघुः।८।६।

"न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव।
स पुरस्कृतमध्यमक्रमो
नमयामास नृपाननुद्धरन्॥"

अग्नेः स्वाहायां जातः पुत्रः। यथा, मार्कण्डेये। ५२। २७-२८॥

"योसावग्निरभीमानी ब्रह्मणस्तनयोऽग्रजः।
तस्मात् स्वाहा सुतान् लेभे त्रीनुदारौजसो द्विज!॥
पावकं पवमानञ्च शुचिञ्चापि जलाशिनम्।
तेषान्तु सन्ततावन्ये चत्वारिंशच्च पञ्च च॥")

निर्मथ्याग्निः। स च गार्हपत्याग्निः। यथा,—
"अथ यः पवमानस्तु निर्म्मथ्योऽग्निः स उच्यते।
स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतः॥"
इति मात्स्ये ४८ अध्यायः॥

पवमानात्मजः, पुं, (पवमानस्य वायोरात्मजः। "वायोरग्निः।" इति श्रुतेर्वायुजन्यतयास्य तथात्वम्। यद्वा, पवमानस्य अग्निविशेषस्य आत्मजः।) हव्यवाहनः। यथा,—
"पवमानात्मजो ह्यग्निर्हव्यवाहन उच्यते॥"
इति मात्स्ये ४८ अध्यायः॥

पवाका, स्त्री, (पुनातीति। पूञ् गि शोधने+"वलाकादयश्च।" उणां ४। १४। इति आकप्रत्ययेन निपातनात् साधुः।) वात्या। चक्रवातः। इत्युणादिकोषः॥

पविः, पुं, (पुनातीति। पूञ् शोधने+"अच इः।" उणां ४। १३८। इति इः।) वज्रम्। इत्यमरः। १। १। ५०॥

पवितः, त्रि, (पूयते स्म। पूङ् शोधे+क्तः।"पूङश्च।" ७।२।५१। इति इट्। "पूङः क्त्वा च।"१।२।२२। इति न कित्त्वम्।) पूतः। इति मुग्धबोधव्याकरणम्॥ मरीचे, क्ली। इति राजनिर्घण्टः॥

पविता [ ऋ ], त्रि, (पुनातीति। पू+तृच्।) पवित्रताकारकः। यथा, नैषधे।

"तनुश्रिया यस्य तृणं स मन्मथः
कुलश्रिया यः पवितास्मदन्वयम्॥"

पवित्रं, क्ली, (पूयतेऽनेनेति। पूं+"पुवः संज्ञायाम्।" ३। २। १८५। इति इत्रः।) वर्षणम्। कुशम्। (यथा, मनुः।२। ७५।
"प्राक्कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः॥")
ताम्रम्। पयः। इति मेदिनी। रे, १७७॥ घर्षणम्। इति विश्वः॥ अर्घोपकरणम्। इति हेमचन्द्रः॥ यज्ञोपवीतम्। इति त्रिकाण्डशेषः॥ घृतम्। मधु। इति राजनिर्घण्टः॥ पार्व्वणश्राद्धादावर्घार्थं होमादावाज्यसंस्काराद्यर्थञ्च साग्रनिर्गर्भकुशान्तरवेष्टितप्रादेशमात्रकुशपत्रद्वयम्। यथा,—
"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥"
इति श्राद्धतत्त्वम्॥
(विष्णुः। यथा, महाभारते। १२।१४६।२०।
"प्रभूतश्चिककुद्धाम पवित्रं मङ्गलं परम्॥"
महादेवः। यथा तत्रैव। १२।१७।३५।
"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः॥")

पवित्रः, त्रि, (पू+इत्र।) व्रतादिना शुद्धः। (यथा, गीतायाम्। ४। ३८।
"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते॥")
तत्पर्य्यायः। प्रयतः २ पूतः ३। एतत्त्रयं प्राणिविषयमात्रम्। शुचिः ४ शुद्धः ५ पवित्रितः ६। इति शब्दरत्नावली॥ पुण्यः ७ पावनः ८। इति जटाधरः॥ (पूयतेऽनेन। पूञ् +"पुवः संज्ञायाम्।"३।२।१८५। इति इत्रः।) शुद्धद्रव्यम्। तत्पर्य्यायः। पूतम् २ मेध्यम् ३। एतत्त्रयं अप्राणिद्रव्यविषयम्। इति ब्रह्मवर्गे विशेष्यनिघ्ने च अमरभरतौ॥ शुद्धम् ४ शुचि ५ पुण्यम् ६ पूतिवत् ७। इति जटाधरः॥
(यथा,—
"वल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम्।
एतत्तु गव्यघृतगुणपरम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

पवित्रः, पुं, (पुनातीति। पू+कर्त्तरि इत्रः।) तिलवृक्षः। पुत्रजीववृक्षः। इति राजनिर्घण्टः॥ (तिलपुत्रजीवशब्दयोरस्य विवृतिर्ज्ञेया॥) कार्त्तिकेयस्य नामान्तरम्। यथा, महाभारते। ३। २३१। ६।
"षष्ठीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः॥")

पवित्रकं, क्ली, (पवित्र+कन्। यद्वा, पवित्रे पयसि कायतीति। कै+कः।) जालम्। इति शब्दरत्नावली॥ शणसूत्रजालम्। इत्यमरः। १। १०। १६॥ क्षत्त्रियस्य यज्ञोपवीतम्। यथा,
"कार्पासमुपवीतं स्याद्विप्रस्योर्द्धवृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥"
इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्यमरटीकायां भरतः॥

पवित्रकः, पुं, (पवित्र+स्वार्थे कन्।) कुशः। दमनकः। अश्वत्थः। उडुम्बरः। इति राजनिर्घण्टः॥

पवित्रधान्यं, क्ली, (पवित्रं धान्यम्। नित्यकर्म्मधारयः।) यवः। इति राजनिर्घण्टः॥ (यवशब्देऽस्य गुणादयो वक्तव्याः॥)

पवित्रा, स्त्री, (पवित्र+टाप्।) तुलसी। इति शब्दमाला॥ नदीभेदः। इति हेमचन्द्रः॥ हरिद्रा। अश्वत्थीवृक्षः। इति राजनिर्घण्टः॥

पवित्रारोपणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोपणं प्रदानं यत्र।) श्रीकृष्णसम्प्रदानकोपवीतदानरूपोत्सवविशेषः। यथा,—
"श्रावणस्य सिते पक्षे द्वादश्यां वैष्णवैर्मुदा।
कर्त्तव्यः कृष्णदेवस्य पवित्रारोपणोत्सवः॥"
अथ तन्नित्यता बह्वृचपरिशिष्टे।
"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
हरिश्च प्रीतिमाप्नोति यः पवित्रं समाचरेत्॥
विधिना शास्त्रदृष्टेन यो न कुर्य्यात् पवित्रकम्।
हरन्ति राक्षसास्तस्य वर्षपूजादिकं फलम्॥"
योगसारे च पवित्रोत्पत्त्युपाख्यानेन नागराजं पवित्रं प्रति श्रीरुद्रेण वरदानम्। यथा,—
"ये त्वां न बहुमन्यन्ते यथा सम्भावितो मया।
जपहोमादिकं तेषां फलं त्वामेतु निश्चयात्॥
विष्णुरहस्ये।
न करोति विधानेन पवित्रारोपणन्तु यः।
तस्य साम्वत्सरी पूजा निष्फला मुनिसत्तम!॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षे वर्षे तु कर्त्तव्यं पवित्रारोपणं हरेः॥"
अथ पवित्रारोपणमाहात्म्यम्।
तत्र बौधायनः।
"यावांस्तन्तुः पवित्रस्य तावत् स्वर्गे महीयते।
आयुरारोग्यमैश्वर्य्यं विपुलं तस्य वर्द्धते॥
महासंहितायाम्।
सम्वत्सरेण या पूजा कृता वै मन्त्रिणा द्विज!।
पवित्रदानात् पूर्णा स्यादित्याह भगवान् हरिः॥
विष्णुरहस्ये।
पवित्रारोपणं विष्णोर्भुवि मुक्तिप्रदायकम्।
स्त्रीपुंकीर्त्तिप्रदं पुण्यं सुखसम्पद्धनावहम्॥
पुण्यानान्तु तथा पुण्यं सर्व्वपापहरन्तु वै।
पवित्रारोपणं तस्मात् पवित्रं परमं स्मृतम्॥
सम्वत्सरे नरो भक्त्या समभ्यर्च्य जनार्द्दनम्।
यत् फलं समवाप्नोति पवित्रारोपणेन तत्॥
किञ्च।
पावयत्येनसो नित्यं त्रायते भवबन्धनात्।
पवित्रं तेन विख्यातं ब्राह्मं तेजोऽभिधीयते॥
विष्णुाख्यया तु विख्यातं तदा लोके विधीयते।
स एव सूत्ररूपेण यज्ञेशः कर्म्मणां प्रभुः॥
तदेव त्रिगुणीसूत्रं ततं नारायणाख्यया।
त्रिदेवात्मा त्रिवेदात्मा त्र्यक्षरः प्रणवः स्मृतः॥"
अथ पवित्रारोपणविधिः।
"सौवर्णै राजतैस्ताम्रैः क्षौमैः सूत्रैस्तु पाद्मकैः।
कार्पासैर्वा पवित्राणीष्यते काशैः कुशैरपि॥